23R

टिळक महाराष्ट्र विद्यापीठ, पुणे

संस्कृत विशारद (बी.ए.) – नियमित

परीक्षा : मे – २०२५

सत्र ४ थे

विषयः ऐतिहासिक काव्ये (23R444)

दिनांक : २०/०५/२०२५	गुण :४०	वेळ : स. १०.०० ते ११.३०

सूचना : सर्व प्रश्न अनिवार्य

प्र.१ अ) माध्यमभाषया आङ्ग्लभाषया वा एकम् अनुवदतो। (१०)

१) तदसदृशमिदम् आर्यस्य । यद्यपि च विभुरनभिमानः। द्विजातिरतेषणः, मुनिररोषणः, कपिरचपलः, कविरमत्सरः, वणिगतस्करः, प्रियजानिरकुहनः, साधुरदरिद्रः, द्रविणवानखतः, कीनाशोऽनक्षिंगतः, मृगयुरहिंस्त्रः, पाराशरो ब्राह्मण्यः, सेवकः सुखी, कितवः कृतज्ञः, परिव्राडबुभुक्षुः, नृशंसः प्रियवाक्, अमात्यः सत्यवादी राजसूनुर्दुर्विनीतश्च जगति दुर्लभः, तथापि ममार्य एवाचार्यः।

२) उपविष्टं च नातिनिकटे तं तद्रा जगाद देवो हर्षः– श्रुतो विस्तर एवास्यार्यव्यतिकरस्यास्मश्चिकीर्तितस्य च । अतः शीघ्रं प्रवेश्यन्तां प्रचारनिर्गतानि गजसाधनानि। न क्षाम्यत्यति स्वल्पमप्यार्यपरिभवपीडापावकः प्रयाणविलम्बम् इत्येवमभिहितश्च प्रणम्य व्यज्ञापयत् – कृतमवधारयतु स्वामी समादिष्टं किन्तु स्वल्पं विज्ञप्यमस्ति भर्तृभक्तेः।

आ) एकं श्लोकम् अनुवदत। (०५)

१) लब्ध्वा कालं भुवमुपगते जेतुमाश्रायिकाख्ये गोविन्दे च द्विरदनिकरैरुत्तरां भीमरथ्याः।
यस्यानीकैर्युधि भयरसज्ञात्वमेकः प्रयातः तत्रावाप्तं फलमुपकृतस्यापरेणापि सद्यः।।

२) नानाहेतिशताभिघातपतितभ्रान्ताश्वपत्तिद्विपे नृत्यद्भीमकबन्धखड्गकिरणज्वालासहस्त्रे रणे।
लक्ष्मीर्भावितचापलापि च कृता शौर्येण येनात्मसाद्राजासीज्जयसिंहवल्लभ इति ख्यातश्चलुक्यान्वयः।।

प्र.२ अ) टिप्पणीद्वयं लिखत। (१०)

राज्यवर्धनस्य विरक्तिविचाराः

स्कन्दगुप्तः

शत्रुराज्ये उपलिङ्गानि

आ) एकां टिप्पणीं लिखत।

रविकीर्तिः। (०५)

यथासङ्ख्यालङ्कारः।

प्र.३ वाक्यद्वयं ससन्दर्भं स्पष्टीकुरुत। (१०)

१. मनसा प्रथमतरं गतस्तपोवनमधोमुखस्तूष्णीमवातिष्ठत।

२. इत्यभिधाय चानन्तरमेव प्रयाणपटहमादिदेश।

३. त्यज्यतां सर्वविश्वासिता।